# <u>दरिद्रदुर्दैव</u>

**दरिद्रदुर्दैवाख्यस्य प्रहसनस्य रचनाशैली आलोचनीया ।**

**उ.** प्रस्तुतं रूपकं प्रहसनलक्षणसम्मतत्वात् हास्यरसप्रधानमेव । प्रायेण प्रहसनस्य हास्यरसः शृङ्गाररसेनपरिपुष्टो भवति । प्रस्तुते प्रहसने तु शृङ्गाररसस्य, प्रकाशः सिद्धदम्पतीमध्ये यथा दृश्यते नायिकानायकयोः मन्दोदरी-वक्रेश्वरयोः आचरणे तु न तथा । अलंकारशास्त्रानुसारतः नान्दी-प्रस्तावना-भरतवाक्यानि सन्निवेशितानि । भाषाव्यवहारविषये यद्यपि विदूषकमुखे प्राकृतभाषा आरोपिता, किन्तु मन्दोदरीमुखे संस्कृतभाषा एव व्यवहृतः विदूषकवचन-वक्रेश्वरकच्छाकर्षणादिना हास्यरसः प्रकाशितः । वणिजः क्षुद्ररामस्य पथ-निर्देशेन सिद्धायाः सिद्धपार्षदस्त्रीणां च मुखे गुस्फोत्पादनेन, सिद्धस्य शिवपार्षद-पुरुषाणां च लाङ्‌गूलोदयेन च हास्यरसः समुल्लसति । प्रहसनस्यास्य भाषा प्रसादगुणसम्पन्ना, वैदर्भी च रीतिः वक्रेश्वर-परिवारस्य दारिद्र्यं तृष्णाकातरत्वञ्च करुणरसं तनोति । दिव्य-पाशकानां कर्षेण अद्‌भुतरसः रसिकचित्तं मोदयति । समकालीन्-समाजचित्रं चास्मिन् प्रहसने सम्यक् परिस्फुटम् । वक्रेश्वरस्य परमस्वार्थपरत्वं प्रतिवेशिसुखासहनं वणिजः क्षुद्ररामस्य क्षुद्रता कृपणता च अतीव रमणीयतया प्रकाशितवान् नाट्यकारः श्री-श्रीजीव-न्यायतीर्थ-महोदयः । छात्रेषु सौहार्द्यभावेन, मानुषेषु स्वार्थपरतया आत्मकेन्द्रिकतया च अतीव मनःकष्टेन एवम्विधानि कति प्रहसनानि तेन विरचितानि । तस्य चरित्रचित्रणं च सहृदह-हृदय-हारि। वक्रेश्वरचरित्रं निम्नोद्‌धृतया अपूर्वसुन्दररूपेण चित्रितम् -

**"अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।**
**समान-धन-गर्वेण स्पर्द्धमानो हि दुःसहः॥"**

तथा च -
**"पाशकक्षेपः सर्वथा रोद्धव्यः। सर्वेषां तण्डुलागमो मम कर्मफलेन समानो यदि स्यात् तदा वरं मे दारिद्यम्।"**

सामाजिक-नराणां स्वार्थपरतया आत्मकेन्द्रिकताया च भृशं पीडितोऽपि श्रीजीवः आशां न परित्यक्तवान् । अतएव भ्हरतवाक्ये प्रार्थितम् -

**"खलता खलतासमाखिलं नरचित्तं परिहाय खेलतु।**
**प्रतिवेशि-सुखाभिलाशिता लसताल्लोकमनःसु सन्ततम्॥"**

प्रहसनमिदं सहृदय-हृदयं सर्वथा हरतीति अलमतिविस्तरेण।